This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M374 विषय पुराण.
नांव श्रीजानकीमहात्म्य.
लेखक/लिपीकार रामनारायण मिश्र.
पृष्ठ 7.
काळ संवत 1952 पूर्ण/अपूर्ण _____.

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ ग्रन्थनिर्विघ्नतासिध्येतन्मचारायचसिनौ ॥ विघ्नहंत्रींनमस्कुर्वे॰
वरदंपञ्चदेवताम् ॥१॥ भालेन्दुखण्डमणिमण्डितगण्डदेशेसिन्दूररक्तवरशुण्डमिभेनतुण्ड
म् ॥ प्रत्युहखण्डनप्रचण्डमनंतदण्डंध्यायेदधानमभयप्रदवक्रतुण्डम् २ यादेवीमधुकैटभंह
तवतीदेवैस्तुतासंयुगेदैत्यानामधिपंचघानमहिषंयासेनयासंयुतम् ॥ चण्डमुण्डमरुग्जदैत्य
मवधीद्यासंगरेतत्क्षणाच्छुंभंदेवरिपुंनिशुंभमहिनोद्यातांभजेचण्डिकाम् ३ जटाजूटमङ्गा
मदहरकृतानङ्गदहनंतथाकार्षीद्यात्रिपुरदहनंयोधकहरम् ॥ स्वभक्तानांन्दणामभयवरदाता
रममलंभजेनंसर्वेशंहिमिगिरिसुताकान्तमनिशम् ४ योमुद्विनास्वजवनोद्घटनंविधत्तेलोकं
प्रबोधयनियोजयनेकयासु ॥ गाढान्धकारदहनेनजगत्प्रकाशंनित्यंकरोतितमहंद्युमणिंनमा
मि ५ योरुक्तत्कृतवीर्यराजतनयस्यायोधनेदोर्धनंपित्राज्ञामधिगम्यसःपरशुनाशात्रंकुलंदग्ध
वान् ॥ निक्षत्रांपृथिवींविधायपरमांत्रिःसप्तकृत्वादद्दौविप्रेभ्योयमदग्निवंशमणयेरामाय
तस्मैनमःदत्रह्मर्षिर्यमदग्निरुग्रतपसेभूभौविचिन्वन्स्थलंगङ्गासुत्तरवाहिनींसुललितांकाश्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रदेशीन्तिके ॥ दृष्ट्वा हृष्टमनास्त्वकारनिलयंसर्वर्षिभिः सेवितंरुद्रोयत्रनिवासमैच्छदनि-
शंकांशीससंभूतले ७ कलिप्रभाजयंतीर्थंगुप्तंपरमपावनम् ॥ मन्दबुद्धिभिरज्ञातंलोकेपापाकु-
लेनरैः ८ स्वक्षेत्रस्यतिरोधानंज्ञात्वारामःस्वयंपुनः ॥ क्षेत्रस्यप्रकटंकर्तुंमहिमानमियेषसः ९ ततः
स्वांशसमुद्भूतंवत्ससिंहंसुधार्मिकं ॥ स्वक्षेत्रदेशाधिपतिंचक्रेस्वकुलजंहरिः १० एकदावत्ससिंहो
सौजमद ग्निपुरेशुभे ॥ समारोप्यशुभांगटिंतदुत्सर्गार्थमागमत् ॥ काशीतोवेदविदुषोविप्रान्नाहूयभ
क्तितः ११ वनोत्सर्गसविधेविप्रेभ्योदक्षिणांददौ ॥ सुप्तेन्द्रपेवत्ससिंहेरामः स्वप्नमदर्शयत् १२ मम क्षे
त्रस्यमाहात्म्यंलोकेभूपप्रकाशय ॥ स्थानंविधायमेमूर्तिंनत्रस्थापयशोभनाम् १३ पजार्थंसर्वलोका-
नांसर्वलक्षणलक्षितां ॥ उत्तरेभैरवंस्थाप्यरक्षिणंहनुमानंतथा क्षेत्रसंरक्षणार्थंहिस्थाप्यःपूर्वेगणाधिपः ॥ क
थांचशृणुभूपालमत्क्षेत्रस्यपुराननीम् १५ पार्वतीशिवसंवादपुराणपरिनिश्चिताम् ॥ परशुरामउवाच
॥ एकदासुखमासीनंकैलाशशिखरेशिवम् १६ पार्वतीपरिप्रच्छसर्वलोकहितायवै १७ पार्वत्युवाच
॥ देवदेवजगन्नाथलोकानुग्रहकारक ॥ त्वतः सर्वंश्रुतंनाथनकिंचिदवशिष्यते १८ ज्ञानयोगःभक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगः कर्मयोगस्तपो विधिः॥ व्रतचर्याविधिर्नाथ श्रुतस्नेकरुणामया १९ इदानीमहमिच्छामि
हर्स्नतद्दस्वमोलघूपायेनयेनस्याल्लोकोद्धारोभवार्णवात् २० घोरेकलौसंप्रवृत्तेजनाः स्वल्पपराक्रमाः
स्वल्पायुषोधर्महीनाःपापकर्मरताःसदा २१ स्वभार्यावंचकानित्यंपरस्त्रीलग्नमानसाः॥ पितृमात्र·
गुरुभ्रात्रद्वेष्टारोवेदनिंदकाः २२ व्रततीर्थतपश्चर्यानिराःकर्तुनचक्षमाः आलस्योपहताः सर्वे महा
व्याधिःप्रपीडिताः २३ कथमेतेतरिष्यंतुस्तरभवसागरं॥ जगतामुपकारायपृच्छामित्वांमहेश्वर
॥ २४॥ उपायंवददेवेशलघुंयेननराधमाः॥ तरंतिधर्मविमुखाकलौघोरंभवार्णवम् २५ श्रीमहादे
वउवाच॥ श्रृणुद्दहस्यैकस्यापिसयानकथितंपुरा॥ तवस्नेहंप्रवक्ष्यामियतस्त्वंममवल्लभा २६ सत्क
र्मभक्तिविज्ञानरहितानांनृणांप्रिये॥ नस्वर्गनचमोक्षोस्तिनरकेपतनंध्रुवम् २७ उद्धारायाभवत्ते
षांनृणांपरमपावनं॥ यमदग्निपुरंक्षेत्रं निर्मितंयमदग्निना २८ तीर्थाटनव्रतश्चर्यानिपुरस्यालस्यदे
हिनां॥ हित्वातीर्थंयामदग्न्यंनायोपशेतिभूतले २९ यमदग्निपुरेस्थित्वागंगामुत्तरवाहिनीम॥ नः
शेनृगाहतेयोवैमुच्यतसर्वकिल्बिषात् ३० यामदग्न्येशुभेतीर्थेस्नात्वाभक्तिपुरःसरम॥ पूजां

२

परशुरामस्यकृत्वानोनिहरेः पदं ३१ यःस्नात्वायामदग्न्येस्मिन्तीर्थेपरमपावने॥ श्राद्धंकरो-
तिवैभक्त्यामयाश्राद्धफलंलभेत् ३२ तीर्थेरामस्ययःस्नात्वापितॄनुद्दिश्यतर्पणम्॥ कुरुतेपितर
स्तस्यलभतेन्वग्निमक्षयां ३३ तीर्थेपरशुरामस्यस्त्रीयतेयद्विजन्मवः॥ तनेषांयातनायामीराम
धामव्रजन्तिते ३४ काश्यांमरणतोमुक्तिर्नृणांभवतिनिश्चितम्॥ भैरवीयातनातत्रनात्रक
स्यापियातनाः ३५ धर्मराजोनिजाद्भृत्यान्निर्यंसिक्षयतेमुहुः॥ यमदग्निमुनेःक्षेत्रेनगंतव्यंमह
त्नया ३६ यमदग्निपुरंत्रातुंनिष्ठंनिपुरतःसुराः॥ हनुमान्दक्षिणेभागेभैरवश्चोत्तरेपुरः ३७
क्षेत्रस्यपूर्वगणपोरक्षकोमुनिनायकः॥ वायोरपिगतिर्नास्तिमुन्यादेशंविनाशुभे ३८ यमद
ग्निमुनेःक्षेत्रेस्थितानन्द्रष्टुंवसंन्निभान्॥ नावलोकलोकपितुंशक्ताःयूयंदृताःसुरस्थितान्
॥३९॥ यमदग्निपुरंक्षेत्रंकाशीतोप्यधिकंभुवि॥ अमरामरणसिद्धंतितीर्थेस्मिन्मोक्षवां-
छया ४० कर्णावतिसमारभ्यदक्षिणेभैरवालयात्॥ यामदग्न्यंविजानीयात्क्षेत्रंमुनिनिमितम्
॥४१॥ धनुषाकृतिसाहस्रंतन्मानंवरिकीर्तितम्॥ महापुण्यतमंक्षेत्रंभुक्तिमुक्तिप्रदायकम् ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पशुकीटखगास्तीर्थेयमदग्निविनिर्मिते ॥ म्रीयंतेयदिकृत्वापितेयांतित्रिदशालयम् ४३ यम
दग्निमुनेः क्षेत्रेतीर्थेपारामनिर्मिते ॥ नरस्तानिसदातस्यमुक्तिमुक्तिःकरेस्थिता ४४ यमद्ग्नि
श्रमेतीर्थेस्नात्वाक्षेत्रपरिक्रमां ॥ यःकरोतिनरोनित्यंसयातिहरिमंदिरं ४५ लोकोद्धारायभ
गवाक्षेत्रमेतन्मकाशितम् ॥ तस्मात्क्षेत्रेऽत्रवस्तव्यंचतुर्वर्गेप्सुभिर्नरैः ४६ पार्वत्युवाच ॥ मर्त्य-
लोकेमुनिसुतः किमर्थमभवद्धरिः ॥ यमदग्निसुतोभूत्वाकिंकर्मकृतवान्हरिः ४७ सर्वज्ञोसि
यतोनाथ पृच्छामित्वांमुहुर्मुहुः ॥ सेक्षेपेणमहादेवसर्वमेतद्वदस्वमे ४८ श्रीमहादेवउवाच ॥
शृणुदेविप्रवक्ष्यामिरामस्योत्पत्तिमुत्तमां ४९ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥
यदायदाहि धर्मस्यग्लानिर्भवतिसुव्रते ५० धर्मसंस्थापनार्थायतदाविर्भवतिप्रभुः ॥ कृ
कोनामराजाऽभूत्सुरापरमधार्मिकः ५१ इन्द्रतुल्यंसुतार्थेहितपस्तेपेसुदारुणम् ॥ पूर्णेवर्षस
हस्रेतुनमपश्यत्सुरोत्तमः ५२ अन्यग्रतपसंदृष्ट्वाक्षोभयग्रस्तःपुरंदरः ॥ उवाचदेवराजस्तुकृ
कंपुरतस्थितं ॥ किमर्थंक्रीयतेराजन्तपउग्रंवदस्वमे ५३ ततःप्रोवाचकृशिकेश्वराजर्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नतः॥पुत्रोमेभवदेवेन्द्र नोचेत्वंसयमेष्यसि ५४ ततः शापभयादिन्द्रोजातः कुशिकवेश्म
नि॥सुराजोभवद्गाधिनाम्नाकुशिकनंदनः ५५ पुरातस्यभवद्भार्यागाधेः परमशोभना॥
तस्यांगाधेः समुत्पन्नाकन्यासत्यवती शुभा॥५६ गाधिस्तांकन्यकांप्राहाद्दचिकायमहर्षये॥
साध्वीपतिंशिषेवेसानित्यंपतिहितेरता ५७ सत्यवत्याःप्रसन्नोभूद्दचीकोभृगुवन्दनः॥स्वत्
पुत्रापविद्धेतरुंगाधेस्तथैवच ५८ ऋचीकःप्राहकृपयास्वांभार्यांपुत्रगृध्रणीम्॥त्वयाभो
ज्यंचरुरयंमात्रेदेयंत्वयंचरुः ५९ चरोरस्यमहिमानुभविष्यतिनवेदशः॥पुत्रस्तपस्वीधृति
मान्द्विजश्रेष्ठोजितेन्द्रियः ६० तेजस्वीक्षत्रियःश्रेष्ठःपुत्रोमानुर्भविष्यति॥क्षत्रियांनकरो१जे
यःसंग्रामेक्षत्रियैर्भुवि ६१ एवमुक्त्वानिजांभार्यांऋचीकोमुनिपुंगवः॥जगामसमहारण्येन-
पःकर्मनपोनिधिः ६२ एतस्मिन्नेवकालेतुतीर्थयात्राप्रसंगतः॥गाधिस्सदारस्तत्रयांद्रष्ट
मागतद्वाश्रमे ६३ अर्घ्यसत्यवतीसाध्वीस्वामीदत्तचरुद्वयम्॥गृहीत्वायत्ननोमात्रेपुत्रा
र्थंसत्यवेदयत् ६४ स्वचरुंप्रददौमातादुहित्रेदैवयोगतः दुहितुश्चरुमज्ञानाभ्यत्यमात्स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पमग्रहीत् ६५ क्षत्रियांतकरं गर्भदधौ सत्यवती तदा॥ क्षात्रेणतेजसायुक्तंमहोग्रं घोरदर्शनम् ६६
एतस्मिन्नन्तरेरण्याद्दचीकोगृहमागमत्॥ गर्भमुग्रंसमीक्ष्याह स्वांभार्यांमुनिपुंगवः ६७ नत्व॰
यासचरुर्भक्षितोयोमयात्वत्कृतेकृतः॥ त्वन्मातुर्यैमयाल्कृप्तश्चरुः संवुभुजेत्वया ६८ तस्मात्तेतन
योदेविक्रूरकर्म्माजनिष्यति॥ मातुस्तेशीलसंपन्नोब्रह्मभूतस्तपोनिधिः ६९ ततः सत्यवती खि॰
न्नापतिंप्रासादयद्वशम्॥ भगवंस्त्वत्प्रसादेनपुत्रोमेनेदृशोभवेत् ७० नैतन्मयान्यथाकर्तुंश॰
क्योमित्याहसोब्रवीत्॥ चरोर्व्यत्यासतोऽवश्यंक्रूरःपुत्रोभविष्यति ७१ पुनः सत्यवती प्राहवंच॰
नान्योचितामम॥ इच्छन्लोकानपिसृजेथाः किंपुनःसुतं ७२ शांततपस्विनंपुत्रंसृजमेऽ
द्यमुने॥ त्वयान्यथानशक्यंचेत्कर्तुंपौत्रंसृजेदृशं ७३ ततस्तस्याःप्रसन्नोभूदृचीकस्तपसो॰
बलात्॥ इत्युवाचप्रतोषार्थंभार्यायाः मुनिपुंगवः ७४ पुत्रेपौत्रेथवादेविविशेषोनास्तिमत्म॰
ते॥ त्वयायथोक्तंचततथाभद्रेभविष्यति ७५ शांतोदांततपस्वीतेपुत्रोदेविजनिष्यते॥ ततः स
त्यवतीपुत्रंयमदग्निंव्यजायत ७६ ऋचिकत्यप्रसादेनशांतंदांततपोनिधिं॥ इक्ष्वाकोरन्वये ४

राजारेणुर्नामबभूवह ७७ तस्यकन्यामहाभागारेणुकासमजायत ॥ राजारेणुः सुतांप्रादाद्दयये
यमदग्नये ७८ ऋचीकोयमदग्निस्तुतस्यांपुत्रमजीजनत् ॥ यामदग्न्यंमहावीर्यंनपोविद्यासम-
न्वितं ७९ क्षत्रियांतकरंरामंप्रदीप्तमिवपावकं ॥ वैशाखस्यसितेपक्षेतृतीयाक्षयसंज्ञिता ॥ ८०
तस्यांरामसमुत्पन्नोरेणुकायांतुभार्गवात् ॥ अधुनातेप्रवक्ष्यामियत्कर्मकृतवान्प्रभुः ८१ यामद
ग्न्यःस्वयंविष्णुःसच्चक्षुष्यवरानने ॥ यदोर्वंशेमहावीर्यःकार्तवीर्योनृपोभवत् ८२ दत्तात्रेय-
प्रभावेणसप्तद्वीपाधिपोभवत् ॥ सकार्तवीर्योनृपतिस्तेपेवर्षायुतंनृपः ८३ दत्तमाराधयामासक्ष
त्रियमत्रिसमुद्भवम् ॥ दत्तात्रेयेणमुनिनादत्तंवरचतुष्टयं ८४ नृपस्यकार्तवीर्यस्यहैहयस्यनपावला
त् ॥ बाहूनांचसहस्राणिभविष्यन्तिनसंशयः ८५ पालयिष्यसिकृत्स्नांत्वंसप्तद्वीपांवसुंधराम् ॥
अजेयोन्यरिवृंदानांधर्मज्ञश्चभविष्यसि ८६ दत्तात्रेयमुनेरेनंलब्ध्वावरचतुष्टयं ॥ कार्तवीर्योमहा
राजःसप्तद्वीपेश्वरोभवत् ८७ पंचाशीतिसहस्राणिवर्षाणीतिनराधिपः ॥ससर्वरत्नभाक्संग्रा
मचक्रवर्तीबभूवह ८८ एकदाक्षुधितेनाग्नौयाचितश्चित्रभानुना ॥ कार्तवीर्योदृढाङ्गोसप्तद्वीपो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तथाग्नयेऽर्पयेशैलाश्चग्रामघोषाश्चनगराणिवनानिच॥ ददाहकार्तवीर्यस्यविषयांस्तुनिभावसुः
॥९०वरुणात्मजाश्रमंचापिशून्यमाश्रममुत्तमं९१ ददाहचित्रभानुस्तुकार्तवीर्येणसंयुतः॥ दग्धं॰
स्वमाश्रमंदृष्ट्वोक्तोभृद्वरुणात्मजः९२ नहाशशापराजानंकार्तवीर्यंजलेशजः॥ यस्मान्ववर्जितं
मिदंत्वयावनमिदंमम९३तस्मात्त्वांयामदग्न्यस्तुरामोयद्धेहनिष्यति॥ सबाहुबलनोदग्नोदत्तात्रेय
वरेणच॥९४मुनिशापान्ननत्रासकार्तवीर्योनराधिपः॥ रामःपितृवधामर्षीमाहिष्मत्यांजगाह॰
॥९५ब्रह्मद्रहांक्षत्रियाणांनाशकर्तामितेन्द्रियः९६ क्षत्रियांतकरंरामंयुद्धार्थंसमुपागतम्॥
श्रुत्वासहैहयोराजायुद्धार्थंसविनिर्गतः९७ दग्नोबाहुसहस्रेणकार्तवीर्योनराधिपः रामेणतु॰
मुलंयुद्धंचकारेणदुर्जयः९८रणेबहुविधंयुद्धंकृत्वामृत्युमवापह॥ तस्यबाहुसहस्रंचभार्गं॰
वःसर्वमच्छिनत्९९परश्वधेनदीप्ततेजसास्तालवनंयथा॥ एवंहत्वामहावीर्यंकार्तवीर्यंसभार्गं॰
वः॥१००॥ जघानक्षत्रियान्सर्वान्दशात्मेरशुनावली॥ त्रिःसप्तकृत्वारामेणमहीनिःक्षत्रियाकृ
ता१०१कृत्वानिःक्षत्रियांपृथ्वीमाजगामपितुःपुरे॥ यमदग्निपुरेरामोराज्यंकृत्वाभुवश्चिर॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९०२॥ सर्वपापविनाशार्थंवाजिमेधमथाकरोत्॥ तस्मिन्यज्ञेसमाजग्मुरादरेणनिमंत्रिताः
९०३ वशिष्ठोगाधिपुत्रश्चतथान्येचमहर्षयः॥ ब्रह्माविष्णुस्तथारुद्रोयज्ञंद्रष्टुंसमागताः९०४यम
दग्निपुरेसर्वेदेवाअपिनिमंत्रिताः॥ स्वंपरशुरामेणवाजिमेधशतंकृतं९०५ यमदग्निपुरेसाङ्गं
यथाविधिसदक्षिणम्॥ वाजिमेधेमहादानंदक्षिणांभृगुनंदनः९०६ कश्यपायददौरम्यांगौ
चायवसुंधराम्॥ गजाँश्चवाजिनःश्रेष्ठान्शांश्चरत्नानिवरः९०७ बहुशागस्तथाधेनुःसुवर्णा
निचकोटिशः॥ ददौरामोमहायज्ञेहयमेधेमहायशाः९०८ यमदग्निमुनेस्तत्रवासंचक्रुर्महर्षयः
पावनंभुविविख्यातविश्वामित्रपुरःसराः९०९ ब्रह्मापिस्थानमकरोद्ब्रह्मतीर्थंचनिर्ममे॥ स्वक
मंडलुगतोयंसर्वतीर्थपयोऽक्षिपत्९१० तत्रस्नानेनलोकानांसर्वतीर्थफलंभवेत्॥ विष्णुरप्यक
रोत्स्थानंयमदग्निपुरेशुभं९११ चक्रेणचक्रतीर्थंचनिर्ममेपावनंनृणां॥ यस्मिन्स्नानान्नराः
शुद्धाःयांतिविष्णोःपरंपदं९१२ एकहायमदग्निस्तुसमाधिमकरोत्तदा॥ जलाहरणकामावैरेणु
कानिर्गताश्रमात्९१३ गंगातीरंसमागत्यददर्शेपरमाद्भुतं॥ गंधर्वाणांचराजानंश्रियापरमया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुतं ११४ युवतीगणसंयुक्तंजलक्रीडारतंशुभं ॥ नाम्नाचित्ररथंदेवंददर्शतत्रस्थितंभवत् ११५
तद्दर्शनमुखासक्तांकंचित्कालंव्यतीत्यसा ॥ मुनिशापभयात्त्रस्तास्वाश्रमंप्रतिनिर्ययौ॰
॥ ११६ ॥ तांदृष्ट्वाभयसंत्रस्तांक्रुद्धःप्राहचतांमुनि ॥ विलम्बकारणंदुष्टेकिंजानंतद्वदस्वमे॰
११७ सत्यमेवस्वयंवृत्तमाहविह्वलमानसा ॥ स्वामिन्नमेपराधोस्तिक्षंतुमर्हसिमेप्रभो ११८ ज
लाहरणकामावैगंगातीरमुपागता ॥ जलक्रीडारतस्तत्रदृष्टःचित्ररथोमया ११९ गंधर्वाधिप
तिस्तत्रयुवतीगणसंवृतः ॥ नमेकश्चनभावोस्तिदृष्टःस्वामिन्विचार्यतां १२० स्त्रीस्वभावा
द्दृतंतत्रकंचित्कालंस्थिताभवम् ॥ इत्युक्तोपितयाक्रुद्धोमुनिःशांतिंनलब्धवान् २१ भार्ग
वंपुत्रमाहूयदारिष्टंवलिनाम्बरं ॥ आज्ञांददौशिरश्छेत्तुंक्रोधान्निष्ठुरवाग्मुनिः ॥ १२२ पि॰
तुराज्ञामादायपितृभक्तस्यभार्गवः ॥ अकर्तव्यःशिरश्छेदोमातुश्चच्छेदमस्तकं २३ पु॰
नःप्रसादयामासपितरंजीवनायवै ॥ यथाजीवतुमेमाताप्रीतस्तत्कर्तुमर्हसि २४ प्रसादितो
मुनिवरःपुत्रेणगतमत्सरः ॥ यमदग्निस्तुतच्छ्रुत्वाप्रादायसरसाजलं १२५ तेनांभसाभिषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेमांरेणुकाग्राहिणोच्छुभां॥ततस्तज्जलमाहात्म्याद्रेणुकाजीविनाभवत् २६ रेणुकातीर्थ
नास्नातत्वातंभुविसरोवरं॥स्नास्यंतिरेणुतीर्थेयेनशदेविप्रयत्नतः २७ नमरत्वंभवेत्तेषांदुर्ल
भंयोगिनामपि॥हतक्षत्रियकीलालरक्तंनिजपरश्वधं २८ समार्जनास्मिन्नरासिस्त्रोच
भृगुनंदनः॥ततःपुभ्रनितीर्थंख्यातपरमपावनं २९ स्नास्यंतियेनरास्तस्मिन्मुक्तिंया
संतिनेधुवं॥ज्ञानवाप्याभिधंतीर्थंयमदग्निविनिर्मितं ३० तजुलाचमनेनाशुतत्वज्ञा
नमवाप्नुयात्॥पश्चिमेमेरवस्थानाज्जाह्नुतरनाहिनी ३१ यामदग्न्याभिधंतीर्थंतस्याः
नामप्रतिष्ठितं॥स्वर्गपातालभूमध्येयानितीर्थानिसंतिच ३२ तेषांफलमवाप्नोतितत्तस्ना
नेनपार्थिव॥वैसाखमासस्यसिताद्वितीयातस्यांनरोरागमनंविधेयं ३३ आगत्यचौलानश
नंविधेयंस्नानंचकृत्वाग्रहतीर्थवासः॥वैसाखमासेऽक्षयसंज्ञिकायांसिताद्वितीयास्यपुण
यदात्री ३४ तस्यांतिथौरामह्रदेनुतीर्थेस्नात्वानरोभ्यंतिनरोभवाब्धिं॥स्नात्वाथभार्गव
मुनेविमलेमुनीर्थेपूजांविधायजमदग्निसुतस्यसम्यक् ३५ क्षेत्रंपरिक्रतिमज्जनिपंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीर्थेषोवैसयानिदिवमाशुविमानसंस्थः॥तृतीयासर्वमासेषुपुण्यास्नानप्रदानयोः१३६प्रति
ष्ठितानभोमासिस्नानेदानेविशेषतः॥त्रिषुमासेषुकर्तव्यंतिलेपश्चेनरैःसदा३७तीर्थस्नानंविशे
षेणदानंचैवपरिक्रमं॥अथध्यानं॥ध्यायेन्नंयामदग्न्यंपृथुलभुजशिलास्तंभविभ्राजमा
नंवक्षःपृष्ठेघनास्त्रव्रणकिणकठिनेसंस्पुवानंधनुष्कान्॥आजन्मब्रह्मचर्यव्रतनियमध
रंदेवदृन्दैःसुसेव्यंविभ्राणंराजवंशक्षपणतुलं घोरधारंकुठारं३९इतिध्यात्वापूजयेत्॥ब्राह्मे
तीर्थेवरिष्टेसुरगणनिलयेसेविते दिव्यतोयेतीर्थेरामपरश्वधारसहितेचक्रेचतीर्थेशुभे॥
तीर्थेरेणुकआश्रमेहरणेस्नास्यंतियेमानवास्तेषांवांछितसिद्धिरत्रपरतोमुक्तिःकरेसं
स्थिता४०नानायज्ञतपःसमाधिनियमैरुत्कृष्टदानव्रतैर्युक्तास्तेपरमर्षयोपिनिलयंयन्ना
पुनंनिध्रुवं॥तद्दानंभुविदुर्लभंगिरिसुतेसंप्राप्नुवंतिक्षणात्पापात्कानजनाःसुकर्मविमुखाः
सुस्नानाच्यांसदा४१कर्णावत्याःउत्तरेभैरवांतेक्षेत्रेपुण्यंजामदग्नेःसुगुप्तं॥धन्यंपुण्यंमु
क्तिकामैकसेव्यंत्वट्टकावैवर्णितंयापनाश४२ब्राह्मण्यंलभतेद्विजःक्षितिपतिस्तेजः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुद्दिष्टंवैश्योविनष्टनिजसम्पत्तिमप्यल्पभनेक्षेत्रस्यमहे वनात्॥४१॥शूद्रोऽप्यनिगदितंवदुविधंसौख्यंचयेशंकराःप्रेम्णापार्वतियेनरामुदितलेसेवंतिनिष्कल्मषाः४२माहात्म्यंयामदग्न्यस्यक्षेत्रस्यकथितंमया॥संक्षेपतोगिरिसुतेश्रद्दधानांपापनाशनं४४पठेद्वापाठयेद्वापिसततंश्रावयेतवा॥ततस्यदुर्लभंकिंचित्सवैत्रसुखभाग्भवेत्४५लोकानांहितकाम्यागिरिसुताकांतेनसंवर्णितंपार्वत्येयमदग्निनिर्मितवरक्षेत्रस्यदिव्यांकथां॥येश्रद्दधानानराःसमाहितहृदोभूत्वाप्रसादाद्धरेस्तेरामस्यचधामकाममखिलंसंप्राप्नुवन्तिक्षितौ॥४६॥इतिश्रीयमदग्निक्षेत्रमाहात्म्यंसंपूर्णम्॥शुभमस्तुभवतुसि॰जै॰छ॰३सं॰१९५२

पुस्तकपुस्तनपाठकजीकीप्रसन्नतासारछपागया
आगरेपंडितरामनारायणसिश्रगौरगोत्रीहनमानजीकेदासानुदासजामदग्निमहात्मप्रकासीनक
सवेजमानियाजिलागाजीपुरआगेहमारेविनाआज्ञानुसारछापनेकाअधिकारनहींहै॰जो॰
कोईछपवावैगाइसपुस्तककोतोइकट२५कैमनसवसेसजापावेगाऔरनकसानीभीलीजायगा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीयमदग्न्याश्रममाहात्म्यसंपूर्ण

श्रीसत्यनारायणयन्त्रालयमानमंदिरवनारसमें छापागया ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=29.11.19 12:12
,TRANSFERRED=2019/11/29 at 12:16:27
,PAGES=19
,TYPE=STD
,NAME=S0002212
,Book Name=M-374-SHRIJAMAD GRANTH MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection